# Shri Subrahmanya Shadakshara Mantra

# શ્રીસુબ્રહ્મણ્યષડક્ષરમન્ત્રઃ

## Document Information

Text title : Shri Subrahmanya Shadakshara Mantra 2

File name : subrahmaNyaShaDashAkSharamantraH2.itx

Category : subrahmanya, mantra, ShaT

Location : doc_subrahmanya

Latest update : March 7, 2023

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

March 7, 2023

*sanskritdocuments.org*

# શ્રીસુબ્રહ્મણ્યષડક્ષરમન્ત્રઃ

આચમનં કુર્યાત્ ।

માતાપિતૃભ્યાં નમઃ ।
શ્રીગુરુભ્યો નમઃ ।
વિઘ્નેશ્વરધ્યાનમ્ -
શુક્લામ્બરધરં વિષ્ણું શશિવર્ણં ચતુર્ભુજમ્ ।
પ્રસન્નવદનં ધ્યાયેત્ સર્વવિઘ્નોપશાન્તયે ॥

પ્રાણાયામં કુર્યાત્ ।

સઙ્કલ્પમ્ -
મમોપાત્ત સમસ્તદુરિતક્ષયદ્વારા શ્રીપરમેશ્વરપ્રીત્યર્થં
શ્રીસુબ્રહ્મણ્યપ્રસાદસિધ્યર્થં શ્રીસુબ્રહ્મણ્યમહામન્ત્રજપં કરિષ્યે ।

અસ્ય શ્રીસુબ્રહ્મણ્યમહામન્ત્રસ્ય દક્ષિણામૂર્તિ ઋષિઃ ।
ગાયત્રી છન્દઃ । શ્રીસુબ્રહ્મણ્યો દેવતા ।
શ્રીસુબ્રહ્મણ્યપ્રસાદસિધ્યર્થે જપે વિનિયોગઃ ।

રં બીજં (દક્ષિણ વક્ષસ્થલમ્) ।
ણં શક્તિઃ (વામ વક્ષસ્થલમ્) ।
વં કીલકં (નાભિઃ) ।

કરન્યાસઃ -
શરવણભવ અઙ્ગુષ્ઠાભ્યાં નમઃ ।
રવણભવશ તર્જનીભ્યાં નમઃ ।
વણભવશર મધ્યમાભ્યાં નમઃ ।
ણભવશરવ અનામિકાભ્યાં નમઃ ।
ભવશરવણ કનિષ્ઠિકાભ્યાં નમઃ ।
વશરવણભ કરતલકરપૃષ્ઠાભ્યાં નમઃ ॥

અઙ્ગન્યાસઃ -
શરવણભવ હૃદયાય નમઃ ।
રવણભવશ શિરસે સ્વાહા ।
વણભવશર શિખાયૈ વષટ્ ।
ણભવશરવ કવચાય હુમ્ ।
ભવશરવણ નેત્રતયાય વૌષટ્ ।
વશરવણભ અસ્ત્રાય ફટ્ ।
ભૂર્ભુવસ્સુવરોમિતિ દિગ્બન્ધઃ ॥ દિગ્વિમોકઃ)

ધ્યાનમ્ -
સિન્દૂરારુણમિન્દુપદ્મજયિભિષ્ષડ્ભિર્મુખૈર્ભાસિતં
    કારુણ્યામૃતપૂરસુન્દરતરૈર્ભાતં દ્વિષલ્લોચનૈઃ।
બિભ્રાણં વરમબ્જયુગ્મમભયં શક્તિદ્વયં કાર્મુકં
    ખડ્ગં ચર્મ પૃષત્કમઙ્કુશગદે વલ્લીશમીક્ષે હૃદિ ॥

પઞ્ચપૂજા ।
લં પૃથિવ્યાત્મને ગન્ધં કલ્પયામિ ।
હં આકાશાત્મને પુષ્પાણિ કલ્પયામિ ।
યં વાય્વાત્મને ધૂપં કલ્પયામિ ।
રં અગ્ન્યાત્મને દીપં કલ્પયામિ ।
વં અમૃતાત્મને અમૃતં મહાનૈવેદ્યં કલ્પયામિ ।
સં સર્વાત્મને તામ્બૂલાદિ સર્વોપચારપૂજાન્ કલ્પયામિ ॥

મૂલમન્ત્રઃ - ॥ ૐ શરવણભવ ॥

(અષ્ટાષ્ટોત્તરશતવારં - 108 times)

પુનરઙ્ગન્યાસઃ -
શરવણભવ હૃદયાય નમઃ ।
રવણભવશ શિરસે સ્વાહા ।
વણભવશર શિખાયૈ વષટ્ ।
ણભવશરવ કવચાય હુમ્ ।
ભવશરવણ નેત્રતયાય વૌષટ્ ।
વશરવણભ અસ્ત્રાય ફટ્ ।
ભૂર્ભુવસ્સુવરોમિતિ દિગ્બન્ધઃ ॥ (દિગ્વિમોકઃ)

ધ્યાનમ્ -

સિન્દૂરારુણમિન્દુપદ્મજયિભિષ્ષડ્ભિર્મુખૈર્ભાસિતં
 કારુણ્યામૃતપૂરસુન્દરતરૈર્ભાતં દ્વિષલ્લોચનૈઃ।
બિભ્રાણં વરમબ્જયુગ્મમભયં શક્તિદ્વયં કાર્મુકં
 ખડ્ગં ચર્મં પૃષત્કમઙ્કુશગદે વલ્લીશમીક્ષે હૃદિ ॥

પઞ્ચપૂજા ।

લં પૃથિવ્યાત્મને ગન્ધં કલ્પયામિ ।
હં આકાશાત્મને પુષ્પાણિ કલ્પયામિ ।
યં વાય્વાત્મને ધૂપં કલ્પયામિ ।
રં અગ્ન્યાત્મને દીપં કલ્પયામિ ।
વં અમૃતાત્મને અમૃતં મહાનૈવેદ્યં કલ્પયામિ ।
સં સર્વાત્મને તામ્બૂલાદિ સર્વોપચારપૂજાન્ કલ્પયામિ ॥

ગુહ્યાતિગુહ્યગોપ્ત્રા ત્વં ગૃહાણાસ્મત્કૃતં જપમ્ ।
સિદ્ધિર્ભવતુ મે દેવ ત્વત્પ્રસાન્મહેશ્વર ॥

અનેન મયાકૃત શ્રીસુબ્રહ્મણ્યમહામન્ત્રજપેન ભગવાન્ સર્વાત્મકઃ
સર્વદેવાત્મકઃ શ્રીસુબ્રહ્મણ્યઃ પ્રીયતામ્ ।
શ્રીસુબ્રહ્મણ્યઃ સુપ્રીતો સુપ્રસન્નો વરદો ભવન્તુ ॥

આચમનમ્ ।

લોકાઃ સમસ્તાઃ સુખિનો ભવન્તુ ।
શ્રીસુબ્રહ્મણ્યઃ પાદારવિન્દાર્પણમસ્તુ ।
શ્રીગુરુભ્યો નમઃ ।
હરિઃ ૐ તત્સત્ ।

ઇતિ શ્રીસુબ્રહ્મણ્યષડાક્ષરમન્ત્રઃ સમ્પૂર્ણઃ ।

*Shri Subrahmanya Shadakshara Mantra*

pdf was typeset on March 7, 2023

Please send corrections to *sanskrit@cheerful.com*